# Atmavireshvara Stotram

# આત્માવીરેશ્વરસ્તોત્રમ્

## Document Information

Text title : Atmavireshvara Stotram

File name : AtmAvIreshvarastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Description/comments : shrIskandapurANe kAshIkhaNDe

Latest update : December 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2022

*sanskritdocuments.org*

# આત્માવીરેશ્વરસ્તોત્રમ્

ધ્યાનમ્ -

વિભૂતિ-ભૂષિતં બાલમષ્ટવર્ષાકૃતિં શિશુમ્ ।
આકર્ણપૂર્ણનેત્રં ચ સુરક્તદશનચ્છદમ્ ॥ ૧॥

ચારુ-પિઙ્ગજટા-મૌલિં નગ્નં પ્રહસિતાનનમ્ ।
શૈશવોચિત-નેપથ્ય-ધારિણં ચિત્રહારિણમ્ ॥ ૨॥

પઠન્તં શ્રુતિસૂક્તાનિ હસન્તં ચ સ્વલીલયા ।
એવં વીરેશ્વરં ધ્યાત્વા સ્તોત્રમેતજ્જપેન્નરઃ ॥ ૩॥

એકં બ્રહ્મૈવાઽદ્વિતીયં સમસ્તં સત્યં સત્યં નેહ નાનાઽસ્તિ કિઞ્ચિત્ ।
એકો રુદ્રો ન દ્વિતીયોઽવતસ્થે તસ્માદેકં ત્વાં પ્રપદ્યે મહેશમ્ ॥ ૧॥

એકઃ કર્ત્તા ત્વં હિ સર્વસ્ય શમ્ભો નાનારૂપેષ્વેકરૂપોઽપ્યરૂપઃ ।
યદ્વત્ પ્રત્યમ્બ્બર્ક એકોઽપ્યનેકસ્તસ્માન્નાઽયં ત્વાં વિનેશં પ્રપદ્યે ॥ ૨॥

રજ્જૌ સર્પઃ શુક્તિકાયાં ચ રૌપ્યં નૈરઃ પૂરસ્તન્મૃગાખ્યે મરીચૌ ।
યદ્વત્ તદ્વદ્ વિષ્વગેષ પ્રપઞ્ચો યસ્મિન્જ્ઞાતે તં પ્રપદ્યે મહેશમ્ ॥ ૩॥

તોયે શૈત્યં દાહકત્વં ચ વહ્નૌ તાપો ભાનૌ શીતભાનૌ પ્રસાદઃ ।
પુષ્પે ગન્ધો દુગ્ધમધ્યે ચ સર્પિર્યત્તચ્છમ્ભો ત્વં તતસ્ત્વાં પ્રપદ્યે ॥ ૪॥

શબ્દઙ્ગૃહ્ણાસ્યશ્રવાસ્ત્વં હિ જિઘ્રે ઘ્રાણસ્ત્વં વ્યઙ્ઘ્રિરાયાસિ દૂરાત્ ।
વ્યક્ષઃ પશ્યેસ્ત્વંરસજ્ઞોઽપ્યજિહ્વઃ કસ્ત્વાંસમ્યકુવેત્ત્યતસ્ત્વાં પ્રપદ્યે ॥ ૫॥

નો વેદસ્ત્વામીશ સાક્ષાધિવેદ નોવાવિષ્ણુર્નો વિધાતાઽખિલસ્ય ।
નો યોગીન્દ્રા નેન્દ્રમુખ્યાશ્ચ દેવા ભક્તો વેદ ત્વામતસ્ત્વાં પ્રપદ્યે ॥ ૬॥

નો તે ગોત્રં નાઽપિ જન્માઽપિ નાખ્યાનો વા રૂપં નૈવ શીલં ન દેશઃ ।
ઇત્થમ્ભૂતોઽપીશ્વરસ્ત્વં ત્રિલોક્યાઃ સર્વાન્ કામાન્ પૂરયેસ્તદ્ભજે ત્વામ્ ॥ ૭॥

ત્વત્તઃ સર્વત્વં હિસર્વસ્મરારેત્વઙ્ગૌરીશસ્ત્વં ચનગ્નોઽતિશાન્તઃ ।

ત્વં વૈ વૃદ્ધસ્ત્વં યુવાત્વઞ્ચબાલસ્તત્કિંયત્ત્વમ્ભાસ્યતસ્ત્વાં નતોઽસ્મિ ॥ ૮॥

સ્તુત્વેતિ વિપ્રો નિપપાત ભૂમૌ સ દણ્ડવદ્યાવદતીવ હૃષ્ટઃ ।
તાવત્સબાલોઽખિલવૃદ્ધવૃદ્ધઃ પ્રોવાચ ભૂદેવ વરં વૃણીહિ ॥ ૯॥

તત ઉત્થાય હૃષ્ટાત્મા મુનિર્વૈશ્વાનરઃ કૃતી ।
પ્રત્યબ્રવીત્ કિમજ્ઞાતં સર્વજ્ઞસ્ય તવ પ્રભો ॥ ૧૦॥

સર્વાન્તરાત્મા ભગવાન્ સર્વઃ સર્વગતો ભવાન્ ।
યાચ્ઞાં પ્રતિનિયુઙ્ક્તે માં કિમીશો દૈન્યકારિણીમ્ ॥ ૧૧॥

ઇતિ શ્રુત્વા વચસ્તસ્ય દેવો વૈશ્વાનરસ્ય હ ।
શુચેઃ શુચિવ્રતસ્યાથ શુચિ સ્મિત્વાઽબ્રવીચ્છિશુઃ ॥ ૧૨॥

બાલ ઉવાચ -
ત્વયા શુચે શુચિષ્મત્યાં યોઽભિલાષઃ કૃતો હૃદિ ।
અચિરેણૈવ કાલેન સ ભવિષ્યત્યસંશયઃ ॥ ૧૩॥

તવ પુત્રત્વમેષ્યામિ શુચિષ્મત્યાં મહામતે ।
ખ્યાતો ગૃહપતિર્નામ્ના શુચિઃ સર્વામરપ્રિયઃ ॥ ૧૪॥

અભિલાષાષ્ટકં પુણ્યં સ્તોત્રમેતત્ત્વયેરિતમ્ ।
અબ્દં ત્રિકાલપઠનાત્ કામદં શિવસન્નિધૌ ॥ ૧૫॥

એતત્ સ્તોત્રસ્ય પઠનં પુત્ર-પૌત્ર-ધનપ્રદમ્ ।
સર્વશાન્તિકરં ચાઽપિ સર્વાપત્ત્યરિનાશનમ્ ॥ ૧૬॥

સ્વર્ગા-ઽપવર્ગ-સમ્પત્તિકારકં નાઽત્ર સંશયઃ ॥

પ્રાતરુત્થાય સુસ્નાતો લિઙ્ગમભ્યર્ચ્ય શામ્ભવમ્ ॥ ૧૭॥

વર્ષં જપન્નિદં સ્તોત્રમપુત્રઃ પુત્રવાન્ ભવેત્ ।
વૈશાખે કાર્તિક માઘે વિશેષનિયમૈર્યુતઃ ॥ ૧૮॥

યઃ પઠેત્ સ્નાનસમયે લભતે સકલં ફલમ્ ।
કાર્તિકસ્ય તુ માસસ્ય પ્રસાદાદહમવ્યયઃ ॥ ૧૯॥

તવ પુત્રત્વમેષ્યામિ યસ્ત્વન્યસ્તત્ પઠિષ્યતિ ।
અભિલાષાષ્ટકમિદં ન દેયં યસ્ય કસ્યચિત્ ॥ ૨૦॥

ગોપનીયં પ્રયત્નેન મહાબન્ધ્યાપ્રસૂતિકૃત્ ।

સ્ત્રિયા વા પુરુષેણાઽપિ નિયમાલ્લિઙ્ગસન્નિધૌ ॥ ૨૧॥

અબ્દં જપ્તમિદં સ્તોત્રં પુત્રદં નાત્ર સંશયઃ ।
ઇત્યુક્ત્વાઽન્તર્દધે બાલઃ સોઽપિ વિપ્રો ગૃહં ગતઃ ॥ ૨૨॥

ઇતિ શ્રીસ્કન્દપુરાણે કાશીખણ્ડે આત્માવીરેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Atmavireshvara Stotram*

pdf was typeset on December 4, 2022

Please send corrections to *sanskrit@cheerful.com*